BESANT EVENING COLLEGE
LIBRARY, MANGALORE - 3.

Reg. No.

**BCMSKLN 201**

**Second Semester B.Com. Degree Examination, July/August 2023**

**(NEP 2020) (2021-22 Batch Onwards)**

**SANSKRIT LANGUAGE (AECC)**

Time : 2 Hours                                                                                    Max. Marks : 60

***सूचना :*** *1)* ***संस्कृत****भाषया,* ***कर्णाटक****भाषया,* ***आङ्ग्ल****भाषया वा उत्तराणि लिखत ।*

*2) प्रश्नसंख्या* ***IV*** *तथा* ***V*** *एतयोः उत्तराणि* ***संस्कृत****भाषया एव लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत ।                                                                    **(1×5=5)**

1) रावण, समुन्नतं पौलस्त्यकुलं पादपस्थोऽपि दूराद् रावणं जगाद । लोभः, परस्त्रीरुचिः, नृशंसत्वं, सत्यत्यागश्च एते पुरुषाणां शुद्ध जन्मपटे कर्दमबिन्दवः । यदि भूपालः परदारान् परामृशेत् तदा नाऽयं धर्मः । किंतु लज्जैषा । यत्र त्रातार एव हन्तारो भवेयुः तत्र रक्षितारः के? पौलस्त्य, शुद्ध यशसः कोसलेन्द्रस्य पत्नीं हरतः तव वक्त्राणि परस्परं किं न लज्जन्ते ? मामरुणपुत्रं गृध्रराजं जटायुषम् अवेहि । मयि जीवति त्वयैषा जानकी हर्तुं न शक्या । मदनान्धेन त्वया रामप्रियां हरता हारधिया कालव्यालः कण्ठे कृतः । दूरदर्शिनः साधवः परिणामार्हं भुञ्जते, शक्यमेव कुर्वते, कलोचितं च जल्पन्ति ।

2) राज्ञाऽवमानितास्ते तानसेनस्य महत्त्वं उपदर्शयितुं सङ्गीतसन्ध्याम् आयोजयामासुः । तदर्थं राजानं नागरांश्च प्रधानानामन्त्रयामासुः । सर्वेषु सामोदं सम्मिलितेषु भगवान् सहस्रकिरणः स्वांशुजालमुपसंहरन्नरसिक इव प्रतीच्यां क्वापि लीनः । तदा तानसेनः सर्वत्र गाढान्धकारं प्रसरन्तं लक्षयन् दीपकरागमारेभे, येन स्वयमेव दीपा दीपिताः । सर्वे विस्मिताश्चित्रवदुपविविशुः । किन्तु हन्त ! ग्रीष्मकाले तस्मिन् जनसम्मर्दभूयिष्ठायां सभायां दीपेषु प्रज्वलितेषु सर्वे पायं स्विन्नगात्रास्तेपुः । इदमालाक्ष्य महानुभावो गायको मल्हाराभिधं रागविशेषं जगौ । अहो ! अचिरादेव शीतलाः शीकराः सर्वानाप्याययन्ति स्म ।

P.T.O.

(4×3=12)

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत ।

1) ये तत्र ब्राह्मणा: संमर्शिनः ।

2) मया अद्यैव परस्त्रीहरणं श्रुतं च अवलोकितम् ।

3) तृष्णैका तरुणायते ।

4) देशे अस्मिन् अधुना सिंहानां पीडा वरीवर्ति ।

5) नास्ति खलु असाध्यं मनोभुवः ।

6) नूनमयं छद्मना वेषेण प्रच्छन्नो धनञ्जयः ।

(3×8=24)

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत ।

1) शिष्याय गुरुणा उपदिष्टान् जीवनमौल्यान् विशदयत ।

2) विराटस्य गोग्रहणं कौरवैः कथं अनुष्ठितम् ? विशदयत ।

3) नापितस्य कथा पञ्चतन्त्रे कथं वर्णितम् ? विशदयत ।

4) अकबरः बीरबलस्य चतुरमतिं कथं परीक्षते ? निरूपयत ।

5) स्वामीविवेकानन्दस्य उपन्यासस्य सारांशं लिखत ।

(1×4=4)

IV. **एकं संस्कृतेन** टिप्पणीं लिखत ।

1) उपनिषत् ।

2) पञ्चतन्त्रम् ।

3) रामायणम् ।

(15×1=15)

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत ।

अ) रेखाङ्कितपदस्य कारकं सूचयत ।

1) <u>अहं</u> केवलं वित्तम् एव चिन्तयामि । (कर्म, करणं, कर्तृ)

2) स्वयमेव <u>दीपकरागम्</u> आरेभे । (कर्म, सम्प्रदानं, कर्तृ)

3) धर्मः एक एव <u>निधने</u> अपि अनुयाति । (अधिकरणं, सम्प्रदानं, कर्तृ)

4) वैराटिः <u>स्यन्दनात्</u> अवप्लुत्य धावति । (कर्म, सम्प्रदानं, अपादानम्)

5) सः <u>तारस्वरेण</u> श्लोकम् अपठत् । (कर्म, करणं, कर्तृ)

आ) वाक्यदोषान् परिहरत ।

1) भगवान् देवतस्य धनुः प्रादात् ।

2) स्वाध्यायेन मा प्रमदः ।

3) वृद्ध वानर, अलं चिन्ता ।

4) पयः उपभोक्तुं न न्याय्यः ।

5) महाराजस्य सह अत्यन्तं वैरमस्ति ।

इ) सन्धिनाम लिखत ।

1) क्रोध + अग्निः – क्रोधाग्निः । (वृद्धिसन्धिः, यण् सन्धिः, सवर्णदीर्घसन्धिः)

2) प्र + उवाच – प्रोवाच । (गुणसन्धिः, यण् सन्धिः, सवर्णदीर्घसन्धिः)

3) तत् + च – तच्च । (वृद्धिसन्धिः, यण् सन्धिः, श्चुत्वसन्धिः)

4) अर्जुनः + तु – अर्जुनस्तु । (वृद्धिसन्धिः, यण् सन्धिः, विसर्गसन्धिः)

5) दर्शनेन + एव – दर्शनेनैव । (वृद्धिसन्धिः, यण् सन्धिः, सवर्णदीर्घसन्धिः)

ई) समासनाम सूचयत ।

1) न सुखम् – असुखम् । (द्विगुः, द्वन्द्वः, नञ् तत्पुरुषः)

2) महान् च असौ राजा च – महाराजः । (कर्मधारयः, तत्पुरुषः, द्विगुः)

3) त्रयाणां भुवनानां समाहारः – त्रिभुवनम् । (द्विगुः, बहुव्रीहिः, तत्पुरुषः)

4) शूलः हस्ते यस्य – शूलहस्तः । (द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः)

5) कृष्णश्च अर्जुनश्च – कृष्णार्जुनौ । (कर्मधारयः, तत्पुरुषः, द्वन्द्वः)

---